# Krishnanarayana Stotram

# कृष्णनारायणस्तोत्रम्

## Document Information

Text title : Krishnanarayana Stotram

File name : kRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 99/43-50||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# कृष्णनारायणस्तोत्रम्

(गोपैः गोपीभिश्च कृतं कृष्णनारायणस्तोत्रम्)
श्रीकृष्णश्च तथा गोपा गोप्यश्चाप्यर्बुदाऽर्बुदाः ।
हरिं प्रसादयामासुस्तोषयामासुरच्युतम् ॥ ४३॥

श्रीकृष्णोऽपि तदा नैजं मूलं परमकारणम् ।
अस्तौच्छ्रीपरमात्मानमवताराऽवतारिणम् ॥ ४४॥

"यतो वयं चावतारास्तव मूर्तेः पृथक्स्थिताः ।
स्मोऽत्र धामाधिपतयस्तस्मै पित्रे नमः सदा" ॥ ४५॥

यतो राधादयश्चापि भवन्मूर्तेः प्रशक्तयः ।
अस्मदर्धाङ्गतां प्राप्तास्तस्मै पित्रे नमो नमः ॥ ४६॥

यतश्चाऽन्येऽसङ्ख्यरूपा अवतारा भवन्त्यपि ।
तस्मै मूलपरब्रह्मपित्रे नमोऽवतारिणे ॥ ४७॥

प्रसन्नो भव कृष्णेश निजरूपेषु सर्वथा ।
यदाज्ञां प्रवहामोऽत्र तस्मै पित्रे मुहुर्नमः ॥ ४८॥

सदा त्वत्पूजनं चात्र करोमि सर्वथा पितः ।
अनुग्रहं सदेच्छामि पावितोऽहं ससार्थकः ॥ ४९॥

एवं स्तुत्वा हरिं नत्वा लब्ध्वा प्रसादमुत्तमम् ।
विदायं प्रददौ कृष्णः कृष्णनारायणाय वै ॥ ५०॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः तिष्यसन्तानात्मकस्य
श्रीकृष्णेन तथा गोपैः गोपीभिश्च कृतं कृष्णनारायणस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ४। अध्याय ९९/४३-५०॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 99/43-50..

Proofread by PSA Easwaran

*Krishnanarayana Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*